# 62 - द्विषष्टितम दशकम्
# गोवर्द्धन यागम्

कदाचिद् गोपालान् विहित मख सम्भार विभवान्
निरीक्ष्य त्वं शौरे मघव मद मुद्ध्वंसितु मनाः ।
विजानन् नप्येतान् विनय मृदु नन्दादिप शुपान्
अपृच्छः को वाऽयं जनक भवताम् उद्यम इति ॥ ॥62-1॥

बभाषे नन्दस् त्वाम् सुत ननु विधेयो मघवतोः
मखो वर्षे वर्षे सुखयति स वर्षेण पृथिवीम् ।
नृणां वर्षायत्तं निखिल मुपजीव्यं महितले
विशेषा दस्माकं तृण सलिल जीवा हि पशवः ॥ ॥62-2॥

इति श्रुत्वा वाचं पितुरयि भवा नाह सरसं
धिगेतन् नो सत्यं मघव जनिता वृष्टि रिति यत् ।
अदृष्टं जीवानां सृजति खलु वृष्टिं समुचितां
महारण्ये वृक्षाः किमिव बलि मिन्द्राय ददते ॥ ॥62-3॥

इदं तावत् सत्यं यदिह पशवो नः कुल धनं
तदाजीव्या यासौ बलि रचल भर्त्रे समुचितः ।
सुरेभ्योऽप्युत्कृष्टाः ननु धरणि देवाः क्षिति तले
ततस्तेऽप्याराध्याः इति जगदिथ त्वं निज जनान् ॥ ॥62-4॥

भवद् वाचं श्रुत्वा बहुमति युतास्तेऽपि पशुपाः
द्विजेन्द्रा नर्चन्तो बलि मददु रुच्चैः क्षिति भृते ।
व्यधुः प्रादक्षिण्यं सु भृश मनमन् नादर युताः
त्व मादश् शैलात्मा बलि मखिल माभीर पुरतः ॥ ॥62-5॥

अवोचश् चैवं तान् किमिह वितथं मे निगदितं
गिरीन्द्रो नन्वेषः स्वबलि मुपभुङ्क्ते स्व वपुषा ।
अयं गोत्रो गोत्र द्विषि च कुपिते रक्षितु मलं
समस्तान् इत्युक्ताः जहृषु रखिला गोकुलजुषः ॥ ॥62-6॥

परिप्रीता याताः खलु भव दुपेता व्रज जुषः
व्रजं यावत्तावत् निज मख विभङ्गं निशमयन् ।
भवन्तं जानन् नपि अधिक रजसाऽऽ क्रान्त हृदयः
न सेहे देवेन्द्रः त्व दुपरचि तात्मोन्नति रपि ॥ ॥62-7॥

मनुष्यत्वं यातो मधुभि दपि देवेष्वविनयं
विधत्ते चेन्नष्टः त्रिदश सदसां कोऽपि महिमा ।
ततश्च ध्वंसिष्ये पशुप हतकस्य श्रिय मिति
प्रवृत्तस् त्वां जेतुं स किल मघवा दुर्मद निधिः ॥ ॥62-8॥

त्वदा वासं हन्तुं प्रलय जलदा नम्बर भुवि
प्रहिण्वन् बिभ्राणः कुलिश मय मभ्रेभ गमनः ।
प्रतस्थेऽन्यै रन्तः दहन मरुदाद्यैर् विहसितो
भवन् माया नैव त्रिभुवनपते मोहयति कम् ॥ ॥62-9॥

सुरेन्द्रः क्रुद्धश् चेत् द्विज करुणया शैल कृपयापि
अनातङ्कोऽस्माकं नियत इति विश्वास्य पशुपान् ।
अहो किन् नायातः गिरिभि दिति सञ्चिन्त्य निवसन्
मरुद्गेहाधीश प्रणुद मुरवैरिन् मम गदान् ॥ ॥62-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥